National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 157-161
© 2025 NJHSR
www.sanskritarticle.com

**सन्दीपकुमारः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ (उत्तरप्रदेशः)

**डा टी महेन्द्रः**
सहाचार्यः,
संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्,
जवाहरलालनेहरुविश्वविद्यालयः,
नवदेहली

**Correspondence:**
**सन्दीपकुमारः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ (उत्तरप्रदेशः)

# ललितविस्तरसूत्रस्य सांस्कृतिक–ऐतिहासिक-महत्त्वम्

**सन्दीपकुमारः, डा टी महेन्द्रः**

ललितविस्तरसूत्रं बौद्धसंस्कृतसाहित्यस्य वैपुल्यसूत्रपरम्परायाम् अत्यन्तं महत्त्वपूर्णो ग्रन्थः वर्तते।[1] अस्मिन् सूत्रे भगवतः बुद्धस्य जीवनचरितं केवलं धार्मिकोपदेशरूपेण न निरूप्यते, अपि तु तत्कालीनभारतीयसंस्कृतेः सजीवं समग्रं च चित्रं समुपस्थाप्यते। बुद्धस्य जन्मनः आरभ्य धर्मचक्रप्रवर्तन-पर्यन्तं वर्णितेषु प्रसङ्गेषु सामाजिकव्यवस्था, शिक्षा-परम्परा, कला-शिल्पपरम्परा, राजनैतिकप्रणाली, आचार-व्यवहारः, नैतिकमूल्यपरम्परा चेत्यादीनि तत्त्वानि स्वाभाविकतया समाविष्टानि दृश्यन्ते।[2] ललितविस्तरसूत्रं न केवलं बौद्धधर्मस्य महायानपरम्परायाः प्रतिनिधिग्रन्थः अस्ति, अपि तु प्राचीनभारतीयसंस्कृतेः प्राचीनेतिहासस्य च सामाजिक-धार्मिक-दार्शनिक-कलात्मकजीवनस्य विश्वसनीयं साहित्यिकस्रोतः अपि मन्यते। सूत्रे वर्णितानि सांस्कृतिकतत्त्वानि ऐतिहासिकस्रोतांसि च तत्कालीनमानवजीवनस्य आदर्शान्, मूल्यबोधं जीवनदृष्टिं च प्रकाशयन्ति।

ललितविस्तरसूत्रस्य कालविषये विद्वत्सु मतभेदः दृश्यते; तथापि उपलब्धैः आन्तरिक-बाह्यप्रमाणैः अस्य ग्रन्थस्य रचनाकालः साधारणतया ईसा-पूर्वं प्रथमशताब्दीतः आरभ्य ईसा-पश्चात् तृतीय-चतुर्थशताब्दीपर्यन्तम् इति निश्चेतुं शक्यते। आन्तरिकप्रमाणदृष्ट्या ललितविस्तरसूत्रे प्रतिपादितः बोधिसत्त्ववादः पारमितापरम्परा च वैपुल्यसूत्रपरम्परायाः विकसितस्वरूपं महायानबौद्धधर्मस्य प्रौढावस्थां सूचयति। एतानि तत्त्वानि प्राचीननिकायग्रन्थेषु अल्पतया दृश्यन्ते; किन्तु ललितविस्तरसूत्रे विस्तरेण उपस्थापितानि सन्ति। अनेन स्पष्टं भवति यत् अस्य ग्रन्थस्य रचना बुद्धपरिनिर्वाणानन्तरं बहोः कालात् परं विकसितायां बौद्धपरम्परायां जाता। बाह्यप्रमाणदृष्ट्या अस्य ग्रन्थस्य चीनीभाषायाम् अनुवादः ईसादृपश्चात् तृतीयशताब्द्यां कृतः इति इतिहासकारैः स्वीक्रियते। अनुवादस्य अस्तित्वात् पूर्वमेव मूलग्रन्थस्य संस्कृतरूपेण प्रचलनम् आसीदिति निःसंशयं निष्कर्षः भवति। अतः ललितविस्तरसूत्रस्य मूलरचना तृतीयशताब्द्याः पूर्वमेव सम्पन्ना इति अनुमानं युक्तियुक्तं मन्यते।

कतिपयैः विद्वद्भिः अयं ग्रन्थः ईसा-पूर्वं प्रथमशताब्द्यामेव आरब्धः; पश्चात् विभिन्नैः सम्प्रदायैः परिष्कृतः, विस्तारितः च इति अपि मतं प्रतिपादितम्। एतेन कारणेन अस्य ग्रन्थस्य वर्तमानस्वरूपं दीर्घकालीनसांस्कृतिक-धार्मिकविकासस्य फलरूपेण अवगन्तव्यम्। अतः वक्तुं शक्यते यत् ललितविस्तरसूत्रस्य रचनाकालः न एकस्मिन् काले निश्चीयते, अपि तु अस्य विकासः ईसा-पूर्वं प्रथमशताब्दीतः ईसा-पश्चात् चतुर्थशताब्दीपर्यन्तं क्रमशः अभवत्। अयं कालः महायानबौद्धधर्मस्य उदय-विकासकालेन सह समन्वितः अस्ति, यत् ललितविस्तरसूत्रस्य धार्मिक-सांस्कृतिकमहत्त्वं सुदृढं करोति।

अस्मिन् शोधपत्रे ललितविस्तरसूत्रे निहितानां सांस्कृतिकतत्त्वानां ऐतिहासिकमहत्वाधायि-विषयाणां च तथ्याधारितं विवेचनं करिष्यते, येन बौद्धकालीनभारतीयसंस्कृतेः समग्रस्वरूपं स्पष्टतया अवगन्तुं शक्यते।

## 1. ललितविस्तरसूत्रे सामाजिकतत्त्वानि

ललितविस्तरसूत्रे बौद्धकालीनभारतीयसमाजस्य सामाजिकसंरचना सुस्पष्टतया प्रतिबिम्बिता दृश्यते। अस्मिन् सूत्रे वर्णाश्रमव्यवस्थायाः स्वरूपं[3], कुलपरम्परायाः महत्त्वं, विवाहप्रथायाः सामाजिकाधारः, नारीस्थितेः विविधपक्षाः, दासप्रथायाः च उल्लेखः प्रासङ्गिकरूपेण उपलभ्यते। एतेषां तत्त्वानां वर्णनं केवलं कथानकस्य पूरकत्वेन न विद्यते, अपि तु तत्कालीनसमाजजीवनस्य यथार्थपरिचायकत्वेन अभिहितं भवति।

ललितविस्तरसूत्रे क्षत्रियप्रधानसमाजव्यवस्था विशेषतया दृष्टिगोचरा भवति।[4] शाक्यकुलस्य, कोलियकुलस्य, मगध-कोसलादिराज्यानां च वर्णनैः राजकुलानां सामाजिकगौरवं, राजनीतिकप्रभावः, समाजे तेषां प्रतिष्ठा च स्पष्टतया प्रतिपाद्यते। राजकुलसम्बद्धाः संस्काराः, सभा-व्यवस्था, राजपरिवारस्य सामाजिककर्तव्यबोधः च बौद्धकालीनराजनीतिक-सामाजिकपरिस्थितेः परिचायकाः सन्ति।

नारीस्थितेः विवेचनं ललितविस्तरसूत्रस्य सामाजिकसंस्कृतिविषये अत्यन्तं महत्त्वपूर्णं पक्षमुद्घाटयति।।[5] यशोधरायाः महाप्रजापत्याः[6] च चरित्रवर्णनैः नारीणां करुणा, त्यागः, धैर्यं, सहनशीलता, नैतिकबलं च स्पष्टतरं भवति। यद्यपि ताः राजपरिवारसम्बद्धाः आसन्, तथापि तासां जीवनवृत्तेषु तत्कालीननारीजीवनस्य सीमानः, अपेक्षाः कर्तव्यबोधः च सुस्पष्टतया परिलक्षितः भवति।

महाप्रजापत्याः प्रव्रज्याग्रहणप्रसङ्गः नारीणाम् आध्यात्मिकाधि-कारस्य प्रारम्भिकस्वीकृतिं सूचयति, यत् सामाजिकदृष्ट्या विशेषमहत्त्वपूर्णं मन्यते।

दासप्रथायाः उल्लेखोऽपि ललितविस्तरसूत्रे उपलभ्यते, यः तत्कालीनसमाजस्य वर्गभेदात्मकसंरचनां सूचयति। बौद्धधर्मस्य करुणा, मैत्री, समत्वदृष्टिः च एतादृशानां सामाजिकबन्धानां नैतिकपुनर्मूल्याङ्कनं करोति। अनेन बौद्धसंस्कृतेः मानवतावादिदृष्टिः सामाजिकजीवने स्पष्टतया प्रतिफलति।

एवं विचार्यमाणे, ललितविस्तरसूत्रे उपवर्णितानि सामाजिक-तत्त्वानि बौद्धकालीनसमाजस्य यथार्थ, सजीवं, बहु-आयामिकं च चित्रं प्रस्तुतं जातम्। अतोऽयं ग्रन्थः केवलं काव्यात्मक-धार्मिकग्रन्थः इति न चिन्तनीयम्, अपि तु सांस्कृतिक-ऐतिहासिकदृष्ट्या अपि अत्यन्तं महत्त्वपूर्णं साहित्यिकस्रोतः इति निःसंशयं सिद्ध्यति।

## 2. ललितविस्तरसूत्रे शैक्षिक-बौद्धिकतत्त्वानि

ललितविस्तरसूत्रे बौद्धकालीनभारतीयसमाजस्य शैक्षिक–बौद्धिकसंस्कृतिः विशदतया प्रतिफलिता दृश्यते। अस्मिन् सूत्रे गुरुकुलप्रणाल्याः स्वरूपम्, आचार्य–शिष्यपरम्परायाः महत्त्वं, शास्त्राध्ययनस्य पद्धतिः, बौद्धिकविकासस्य आदर्शाः च सुस्पष्टतया निरूपिताः सन्ति।[7] शिक्षा केवलम् औपचारिकज्ञानप्राप्तेः साधनं न, अपि तु जीवननिर्माणस्य, चरित्रसंस्कारस्य, आत्मोन्नतेः मूलाधाररूपेण च अत्र स्वीकृता दृश्यते।

ललितविस्तरसूत्रे बोधिसत्त्वस्य गुरुकुलप्रवेशः, विविधविद्याभ्यासः, आचार्यैः सह संवादाः च उल्लिख्यन्ते। अत्र वेदाङ्गशास्त्राणि, व्याकरणम्, तर्कविद्या, लिपि-भाषाज्ञानम्, गणितम्, ज्योतिषम्, आयुर्वेदविद्या च अध्ययनविषयरूपेण निर्दिष्टानि सन्ति। बोधिसत्त्वस्य अल्पकाले एव बहुविधविद्यापारंगतता तत्कालीनशिक्षाप्रणाल्याः उच्चस्तरं, व्यापकतां व्यवस्थितरूपं च सूचयति। विशेषतया लिपि-भाषाज्ञानस्य उल्लेखः तत्कालीनबौद्धिकसंस्कृतेः उन्नतिम् उद्घाटयति। लेखनकला, अभिलेखनप्रणाली, शास्त्रपरम्परायाः संरक्षणे च लिपिज्ञानस्य उपयोगः स्पष्टतया परिलक्षितः भवति। एतेन सिद्ध्यति यत् बौद्धकालीनसमाजे मौखिकपरम्परायाः सह लेखनपरम्परायाः अपि सम्यग् विकासः आसीत्।

ललितविस्तरसूत्रे शैक्षिकसंस्कृतिः केवलं बौद्धिकप्रावीण्यपर्यन्तं सीमिता न दृश्यते। अत्र शिक्षायाः परमं लक्ष्यं नैतिकसंस्कारः, संयमः, करुणा, विवेकः, आध्यात्मिकपरिपक्वता च इति प्रतिपाद्यते।[8] बोधिसत्त्वस्य शिक्षाप्रक्रिया ज्ञान–कर्म–नैतिकता–आध्यात्मिकता इत्येषां चतुर्युग्मस्य समन्वितरूपेण प्रस्तुतं भवति।

अतः ललितविस्तरसूत्रे प्रतिपादिता शैक्षिक–बौद्धिकसंस्कृतिः बौद्धकालीनभारतीय-शिक्षाव्यवस्थायाः आदर्शात्मकं मूल्याधारितं च स्वरूपं दृश्यते। अस्मिन् सूत्रे प्राप्तानां सूचनानाम् आधारेण वक्तुं शक्यते यत् अयं ग्रन्थः शिक्षां केवलं जीविकोपार्जनस्य साधनत्वेन न उपस्थापयति, अपि तु एतस्य उल्लेखानाम् आधारेण ज्ञायते यत् तदानीन्तनकाले मानवजीवनस्य नैतिक-आध्यात्मिकपरिष्कारस्य प्रभावकारिमाध्यमः मन्यते। अतः शिक्षायाः महत्त्वं मानवीयजीवनस्य उत्कृष्टतायै वर्तते स्म इति अस्य शैक्षिकदृष्टेः वैशिष्ट्यं निःसंशयं प्रतिपादितं भवति।

## 3. ललितविस्तरसूत्रे कला-शिल्प-वास्तु-संगीतादयः

ललितविस्तरसूत्रे बौद्धकालीनभारतीयसंस्कृतेः कला-परम्परा अत्यन्तं समृद्धा, परिष्कृता, सौन्दर्यप्रधानरूपेण प्रतिफलिता च दृश्यते। अस्मिन् सूत्रे शिल्पकला, वास्तुकला, मूर्तिकला, अलंकारनिर्माणम्, संगीत-नृत्य-वाद्यवर्णनं च विस्तरेण उपवर्णितम् उपलभ्यते; येन तत्कालीनसमाजस्य सौन्दर्यबोधः, कलारुचिः, सृजनात्मकचेतना च स्पष्टतया प्रकाश्यते।

ललितविस्तरसूत्रे राजप्रासादानां सुवर्णमयता, रत्नखचितस्तम्भाः, सुशोभितसभागृहाणि, नगररचनायाः सुसंयोजितस्वरूपं च वास्तुकलायाः उन्नतावस्थां सूचयन्ति। राजप्रासादेषु सार्वजनिकस्थलेषु सौन्दर्यस्य, उपयोगितायाः, धार्मिकभावनायाः समन्वयः च दृष्टिगोचरः भवति। एतानि वास्तुवर्णनानि बौद्धकालीननगरसंस्कृतेः

समृद्धिं, सामाजिकवैभवं, सौम्यजीवनशैलीं च प्रकाशयन्ति। मूर्तिकलाविषयेऽपि ललितविस्तरसूत्रे महत्वपूर्णसंकेताः उपलभ्यन्ते।[9] यद्यपि बुद्धप्रतिमानां प्रत्यक्षवर्णनम् अल्पम् अस्ति, तथापि स्तूपनिर्माणपरम्परा, प्रतीकात्मकपूजाविधानं, अलंकारयुक्तधार्मिक-संरचनानां उल्लेखः तत्कालीनधार्मिक-कलाभावनां च सूचयति। स्तूपाः धार्मिकसंरचनारूपेण निर्मिताः आसन्, अनेन च सह कलात्मक-सांस्कृतिककेन्द्ररूपेण अपि समाजजीवने प्रतिष्ठिताः आसन्।[10]

संगीत-नृत्य-वाद्यादीनि अपि ललितविस्तरसूत्रे सजीवरूपेण चित्रिता दृश्यते। राजसभासु, उत्सवसमये, देवसभा-वर्णनप्रसङ्गेषु गीत-वाद्य-नृत्यानां च उल्लेखः कला-मनोरञ्जनस्य सामाजिकमहत्त्वं प्रकाशयति। वीणा-दुन्दुभि-मृदङ्गादीनां वाद्यानां प्रयोगः तत्कालीनसंगीतपरम्परायाः विकासं सूचयति। नृत्यं केवलं मनोरञ्जनमात्रं न, अपि तु सांस्कृतिक-अभिव्यक्तेः, भावसंप्रेषणस्य, आध्यात्मिकानुभूतेः च माध्यमरूपेण अत्र स्वीक्रियते। अलंकारनिर्माणं, वस्त्रसज्जा, आभूषणप्रयोगश्च बौद्धकालीनसौन्दर्यचेतनायाः द्योतकत्वेन स्वीकर्तव्यम्। राजपरिवारस्य, देवकन्यानां, सभासदां च अलंकारवर्णनैः समाजे सौन्दर्यस्य, कलाकौशलस्य, ऐश्वर्यस्य च आदरभावः परिलक्षितः भवति।[11]

एवं ललितविस्तरसूत्रे प्रतिपादितानि कला-संस्कृतितत्त्वानि ऐतिहासिकतत्त्वानां वर्णनानि च बौद्धकालीनभारतीयसंस्कृतेः सौम्य-सौन्दर्यप्रधानम्, आध्यात्मिकसहजीवनयुक्तं, कलात्मकदृष्ट्या परिष्कृतं स्वरूपं च उद्घाटयन्ति। अतोऽयं ग्रन्थः न केवलं धार्मिककथाग्रन्थः, अपि तु भारतीयकला-संस्कृतेः महत्त्वपूर्णः ऐतिहासिक-साहित्यिकस्रोतः इति निःसंशयं स्वीकरणीयम्।

## 4. धार्मिक-नैतिकतत्त्वानि

ललितविस्तरसूत्रे बौद्धधर्मस्य धार्मिक–नैतिकतत्त्वानि अत्यन्तं सुव्यवस्थितरूपेण प्रतिपादितानि दृश्यते। अस्मिन् सूत्रे त्रिरत्नशरणगमनं (बुद्धधम्मसंघानां शरणागतिः) जीवनमार्गस्य मूलाधाररूपेण स्वीकृतम् अस्ति। एतद् रत्नत्रयं धार्मिकश्रद्धायाः विषयत्वेन तु वर्तते एव; अपि तु मानवजीवनस्य नैतिकदिशानिर्देशकत्वेनापि अवश्यं स्वीकरणम्।[12]

पंच शीलानां प्राणातिपातविरतिः, अदत्तादानविरतिः, काममिथ्या-चारविरतिः, मृषावादविरतिः, सुरामेरयमज्जपमादट्ठानविरतिः इत्येतेषां प्रतिपादनं ललितविस्तरसूत्रे सामाजिकनैतिकतायाः आधाररूपेण दृश्यते। एते नियमाः व्यक्तिजीवनस्य शुद्धतां, समाजजीवनस्य सौहार्दं, मानवसम्बन्धानां नैतिकसन्तुलनं च सुनिश्चितं कुर्वन्ति। अष्टाङ्गिकमार्गस्य (सम्यग्दृष्टिः, सम्यक्सङ्कल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिः) वर्णनं बौद्धनैतिकदर्शनस्य व्यवहा-रात्मकस्वरूपम् उद्घाटयति। अयं मार्गः मोक्ष साधनेन सह जीवनव्यवस्थायाः सम्यक् सञ्चालनाय मार्गदर्शकः इति अत्र प्रतिपाद्यते।

ललितविस्तरसूत्रे करुणा-मैत्री-अहिंसा-क्षान्ति-दयादीनां गुणानां विशेषमहत्त्वं दृश्यते। एते गुणाः बौद्धधर्मस्य नैतिकहृदयम् इव सन्ति; येन प्रत्येकं प्राणिनं प्रति समभावः, सहानुभूतिः, करुणामयदृष्टिः च विकसितता भवति।[13] अत्र नैतिकता केवलम् आत्मकल्याणपर्यन्तं सीमिता न वर्तते; अपि तु सर्वप्राणिहिताय प्रवृत्ता दृश्यते। बोधिसत्त्ववादः ललितविस्तरसूत्रस्य धार्मिक–नैतिकसंस्कृतेः केन्द्रीयतत्त्वं वर्तते।[14] बोधिसत्त्वः स्वस्य मोक्षं स्थगयित्वा सर्वसत्त्वानां दुःखनिवारणाय प्रवृत्तः भवति—

इति आदर्शः मानवजीवनस्य सर्वोच्चनैतिकदृष्टिं सूचयति। दान-शील-क्षान्ति-वीर्य-ध्यान-प्रज्ञादीनां पारमितानां परम्परा त्याग-सेवा-आत्मसंयम-विवेकादीनां समन्वितरूपं प्रतिपादयति। गृहत्यागस्य नैतिकाधारः अपि ललितविस्तरसूत्रे स्पष्टतया निरूपितः अस्ति। बोधिसत्त्वस्य गृहत्यागः पलायनरूपेण नासीत्; अपि तु मानवदुःखनिवारणाय, सत्यान्वेषणाय, विश्वकल्याणाय च समर्पितनैतिकनिश्चयरूपेण चित्रितः भवति। अनेन त्यागस्य आध्यात्मिक-नैतिकमहत्त्वं सामाजिकदृष्ट्या अपि प्रतिष्ठाप्यते।

एवं ललितविस्तरसूत्रे प्रतिपादिता धार्मिक–नैतिकसंस्कृतिः बौद्धधर्मस्य मानवतावादिकं, करुणामूलकत्वं, विश्वकल्याणाभिमुख-दृष्टिमत्त्वं च सुदृढतया प्रकाशयति। अतो बौद्धपरम्परा केवलं संन्यासप्रधानधर्मरूपेण न वर्तते; एषा नु नैतिकमूल्याधारित-जीवनपद्धतिरूपेण मानवसभ्यतायां विशिष्टस्थानं प्राप्नोति—इति निःसंशयं प्रतिपद्यते।

## 5. दार्शनिकतत्त्वानि

ललितविस्तरसूत्रे बौद्धदर्शनस्य मूलतत्त्वानि सांस्कृतिकसन्दर्भेण समन्वितरूपेण प्रतिपादितानि दृश्यन्ते। अस्मिन् सूत्रे अनित्यं, दुःखं, अनात्मा—इति त्रिलक्षणानि केवलं दार्शनिकसूत्ररूपेण न; अपि तु जीवनानुभवेन सम्बद्धतया निरूपितानि सन्ति।[15] संसारस्य क्षणभङ्गुरता, दुःखसर्वव्यापकता, आत्माभावः चेत्येतानि तत्त्वानि मानवजीवनस्य यथार्थबोधाय, आसक्तिनिवारणाय विवेकविकासाय च उपदिश्यन्ते।

कर्म-पुनर्जन्मसिद्धान्तस्य विवेचनं ललितविस्तरसूत्रे दार्शनिक-नैतिकसमन्वयरूपेण उपस्थाप्यते।[16] अत्र कर्म केवलं दैवाधीन-फलसिद्धान्तरूपेण नैव उपवर्णितं वर्तते; अत्र तु नैतिक-

उत्तरदायित्वस्य, मानवस्वातन्त्र्यस्य, चरित्रनिर्माणस्य च मूलाधार-रूपेण प्रतिपादितं विद्यते। पुनर्जन्मसिद्धान्तः तु कर्मफलनियमस्य निरन्तरत्वं, नैतिकन्यायस्य स्थायित्वं, मोक्षमार्गस्य दीर्घकालीन-साधनां च सूचयति।

सम्यक्बोधिप्राप्तेः मार्गः (यः अज्ञाननिवृत्तिः, प्रज्ञाविकासः, करुणा-समन्वयः च इत्येषां आधारः) ललितविस्तरसूत्रे व्यवहारिकदृष्ट्या निरूपितः अस्ति। अत्र 'बोधिः' केवलं बौद्धिकबोधमात्रं उपवर्णितमस्ति; अपि तु सम्पूर्णजीवनपरिवर्तनस्य अवस्था मन्यते।[17] ध्यान, प्रज्ञा, शील, करुणा च— एतानि तत्त्वानि बोधिप्राप्तेः साधनरूपेण सांस्कृतिकजीवने प्रतिष्ठितानि दृश्यन्ते। ललितविस्तरसूत्रे दार्शनिकचिन्तनं केवलं तात्त्विकविचारपरिसीम्नि न स्थितम्, अपि तु सामाजिक-नैतिक-आध्यात्मिकजीवनस्य मार्गदर्शकसंस्कृतिरूपेण प्रस्तुतम्। दर्शनम् अत्र जीवनपद्धतिः भवति, येन मनुष्यः दुःखनिवृत्तिं, सम्यग्जीवनमार्गं, सर्वसत्त्वहिताय प्रवृत्तिं च साधयति। एवं ललितविस्तरसूत्रं महायानबौद्धदर्शनस्य प्रारम्भिको ग्रन्थः सन्नपि प्राचीनभारतीयदर्शनपरम्परायाः महत्त्वपूर्णं संक्रमणग्रन्थरूपरूपेण तात्कालिकायाः संस्कृतेः ललितविस्तरकालस्य इतिहासं च सम्यक्तया उपस्थापयति। अयं ग्रन्थः बौद्धदर्शनं शुष्कतत्त्वचिन्तनात् उद्धृत्य जीवनसंस्कृतिरूपेण प्रतिष्ठापयति—इति अस्य प्रमुखं वैशिष्ट्यं निःसंशयं सन्दृश्यते।

समग्रतया विचार्यमाणे सति ललितविस्तरसूत्रे निहितानि सांस्कृतिकतत्त्वानि ऐतिहासिकतत्त्वानि च प्राचीनभारतीय-बौद्धसंस्कृतेः बहुआयामयुतां, समन्वितां, मानवतावादिकीं च दृश्यावलीं सुस्पष्टतया प्रकाशयन्ति। सामाजिकसंरचना, शैक्षिक–बौद्धिकपरम्परा, कला–सौन्दर्यबोधः, धार्मिक–नैतिकमूल्यव्यवस्था, दार्शनिकचिन्तनं चेति एतानि सर्वाणि तत्त्वानि परस्परसम्बद्धतया सूत्रे निरूपिताः सन्ति; येन तत्कालीनमानवजीवनस्य समग्रस्वरूपं ज्ञायते। ललितविस्तरसूत्रं केवलं बुद्धचरितवर्णनपरकः धर्मग्रन्थः इति सीम्नि न तिष्ठति; अपि तु भारतीयसंस्कृतेः सामाजिक-नैतिक-आध्यात्मिक- बौद्धिकविकासस्य विश्वसनीयः च ऐतिहासिक–सांस्कृतिकस्रोतः इति अस्य महत्त्वं निःसंशयं स्वीकरणीयम्। सूत्रे लौकिकजीवनस्य आध्यात्मिकजीवनस्य समन्वयः च यथार्थतया प्रदर्शितः अस्ति, यत्र धर्मः जीवनविमुखः न, अपि तु जीवनमार्गदर्शकरूपेण प्रतिष्ठितः भवति।

अतः ललितविस्तरसूत्रस्य अध्ययनं भारतीयसंस्कृत्याः समग्रबोधाय, बौद्धधर्मस्य सांस्कृतिकप्रभावस्य आकलनाय, प्राचीनभारतीय-सभ्यतायाः मानवतावादीदृष्टेः च सम्यग् अवगमनाय अत्यन्तं उपयोगी सिद्ध्यति। एतदध्ययनं न केवलं अतीतस्य बोधं जनयति, अपि तु आधुनिकमानवसमाजाय अपि नैतिक–सांस्कृतिकदिशानिर्देशं दातुं समर्थं भवति इति अस्य अध्ययनस्य समग्रं फलितं निःसंशयं प्रतिपाद्यते।

**सन्दर्भग्रन्थसूची**


1. **ललितविस्तरसूत्रम्** — सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963।
2. **ललितविस्तर : दार्शनिक एवं सांस्कृतिक सर्वेक्षण** — शारदा गांधी, परिमल पब्लिकेशन्स, दिल्ली, 2002।
3. **बुद्धचर्या** — राहुल सांकृत्यायन, हिन्दी ग्रन्थ अकादमी, पटना, 1956।
4. **बौद्ध दर्शन का इतिहास** — डॉ. टी. एन. मिश्र, चौखम्बा विद्याभवन, वाराणसी, 2005।
5. **प्राचीन भारत का सामाजिक इतिहास** — डॉ. राधाकृष्ण शर्मा, राजकमल प्रकाशन, दिल्ली, 1998।
6. **प्राचीन भारत का आर्थिक इतिहास** — रामशरण शर्मा, दिल्ली विश्वविद्यालय, 2001।


**सन्दर्भः -**

[1] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, प्रस्तावना, पृ. 1– 6।

[2] ललितविस्तर : दार्शनिक एवं सांस्कृतिक सर्वेक्षण, शारदा गांधी, परिमल पब्लिकेशन्स, दिल्ली, 2002, पृ. 9– 15।

[3] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, परिवर्त 7– 10, पृ. 85– 112।

[4] बुद्धचर्या, राहुल सांकृत्यायन, हिन्दी ग्रन्थ अकादमी, पटना, 1956, पृ. 40– 55।

[5] प्राचीन भारत का सामाजिक इतिहास, डॉ. राधाकृष्ण शर्मा, राजकमल प्रकाशन, दिल्ली, 1998, पृ. 68– 80।

[6] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, परिवर्त 13, पृ. 165– 170।

[7] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, परिवर्त 12, पृ. 145– 160।

[8] बौद्ध दर्शन का इतिहास, टी. एन. मिश्र, चौखम्बा विद्याभवन, वाराणसी, 2005, पृ. 52– 60।

[9] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, परिवर्त 6 एवं 9, पृ. 70– 95।

[10] ललितविस्तर : दार्शनिक एवं सांस्कृतिक सर्वेक्षण, शारदा गांधी, परिमल पब्लिकेशन्स, दिल्ली, 2002, पृ. 85– 95।

[11] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, परिवर्त 4, पृ. 45– 52।

[12] तत्रैव, परिवर्त 15, पृ. 190– 205।

[13] बौद्ध दर्शन का इतिहास, टी. एन. मिश्र, चौखम्बा विद्याभवन, वाराणसी, 2005, पृ. 70– 85।

[14] ललितविस्तर : दार्शनिक एवं सांस्कृतिक सर्वेक्षण, शारदा गांधी, परिमल पब्लिकेशन्स, दिल्ली, 2002, पृ. 110– 125।

[15] ललितविस्तरसूत्र, सम्पा. पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट, दरभंगा, 1963, परिवर्त 21, पृ. 260– 275।

[16] बौद्ध दर्शन का इतिहास, टी. एन. मिश्र, चौखम्बा विद्याभवन, वाराणसी, 2005, पृ. 95– 110।

[17] बुद्धचर्या, राहुल सांकृत्यायन, हिन्दी ग्रन्थ अकादमी, पटना, 1956, पृ. 120– 135।